दिनाङ्क :- 25.06.2025 प्रात: - 06:55

<u>प्रधानमन्त्री-शताब्दपूर्तौ</u>

प्रधानमन्त्री नरेन्द्र मोदी अकथयत् यत् आपरेशन् सिन्दूर् इत्यनेन आतङ्कवादेति विषये भारतस्य शून्य-सहिष्णुता-नीते: प्रबलं वैश्विकं च सन्देशम् प्रेषितम्। सः अवदत् यत् भारतीयनागरिकाणां हानिं जनयितारं कुत्रापि स्थानं सुरक्षितं नास्ति इति भारतं स्पष्टम् अकरोत्। ह्य: नवदेहल्यां भारतस्य महान् आध्यात्मिक-नैतिकनेतृभ्यां श्रीनारायणगुरु-महात्मागान्धी-इत्येतयोः मध्ये आयोजितस्य ऐतिहासिक-संवादस्य शतवार्षिक-उत्सवे प्रधानमन्त्री भाषणं कुर्वन् आसीत्।

सः अवदत् यत् केरलस्य शिवगिरि-मठे एकशताब्देः पूर्वं श्रीनारायण-गुरु-महात्मा-गान्धी-इत्येतयोः मध्ये जातेन ऐतिहासिकसंवादेन स्वातन्त्र्य-आन्दोलनाय नूतना दिशा दत्ता।

<u>संविधान-हत्या-दिवसः</u>

पंचसप्तत्यधिकनवदशशततमवर्षस्य जून्-मासस्य पंचविशति: दिनाङ्के यदा भारतीय संविधानस्य पतनम् अभवत् तदा किं अभवत् इति दिवसोऽयं स्मारयति। आपत्कालस्य आधिक्येन पीडितेभ्यः जनेभ्यः श्रद्धाञ्जलिं दातुम् अपि एषः दिवसः अस्ति। वर्धमानस्य राजनैतिक-अशान्तेः, न्यायिक-विकासस्य च पृष्ठभूमौ आपत्कालस्य घोषणा कृता, येन शासकनेतृत्वस्य वैधतायाः प्रकम्पनं जातम्। आकाशवाण्या: मन् की बात् इत्यस्मिन् कार्यक्रमे स्वस्य विचारान् प्रकटयन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् आपत्काल: भारतीय-इतिहासस्य कृष्णतमः अध्यायः आसीत् इति।

<u>भारत-युद्धविराम</u>

इरान्-इस्राइल-देशयोः मध्ये युद्धविरामस्य भारतेन स्वागतम् विहितम्।

। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अमेरिकादेशस्य कतर्-देशस्य च भूमिकायाः प्रशंसाम् अकरोत्। अस्मिन् प्रदेशे प्रचलितानां संघर्षाणां समाधानार्थं वार्तालापा: नीतय: च अन्यतमेषु उपायेषु परिगण्यते।

मन्त्रालयः अवदत् यत् एतेषु प्रयासेषु भारतं योगदानं कर्तुं सज्जम् अस्ति तथा च सर्वे सम्बद्धपक्षाः निरन्तरशान्तेः स्थिरतायाः च कृते कार्यं करिष्यन्ति इति आशां करोति। भारतं समग्रस्य निरन्तरस्य च प्रादेशिकसुरक्षायाः स्थिरतायाः च विषये गभीरतया चिन्तितम् अस्ति इति अवदत्।

<u>इरान्-इस्रेल्-सङ्घर्षः-</u>

इसराइल , इरान्- देशयोः मध्ये युद्धविरामस्य पश्चात् अपि युद्ध: प्रवर्तते, अपि च नियमस्योलंघनमाचर्यते एतदर्थं अमेरिकादेशस्य राष्ट्रपतिः डोणाल्ड् ट्रम्पः विषयस्यास्य निन्दामकरोत्। ट्रम्पः अवदत् यत् सः इस्रायेल्-देशस्य प्रधानमन्त्रिणं बेञ्जमिन् नेतन्याहु-वर्यं इरान्-देशं प्रति गच्छतां इस्रायेल्-देशस्य विमानान् पुनः आकारयितुम् उक्तवान् इति। अमेरिकादेशस्य राष्ट्रपतिः इस्रायेल्-देशम् उद्दिश्य इरान्-देशस्य उपरि विस्फोटक-प्रहारं मा करोतु इति अवोचत्।

एतदतिरिच्य, इस्रायेल्-देशस्य प्रशासनं एकस्मिन् वक्तव्ये अवदत् यत्, श्री नेतन्याहु- राष्ट्रपति- ट्रम्प्-वर्ययो: मध्ये वार्तायाः अनन्तरं इजराइल देश:इरान्-देशस्य उपरि इतोऽपि प्रहारान् स्थगयत् इति। अपरपक्षे, इरान्-देशस्य राष्ट्रपतिः मसूद् पेज़िशयन् इत्येषः अवदत् यत् यावत् इस्रायेल्-देशः युद्धविरामस्य सम्मानं करिष्यति तावत् तस्य देशः युद्धविरामस्य परिपालनं करिष्यति इति।